Ex/Sans/UG/5.3/39/2018 (S)

**BACHELOR OF ARTS EXAMINATION, 2018**

**(SPECIAL SUPPLEMENTARY)**

(3rd Year 5th Semester)

**SANSKRIT (Honours)**

**Course: XIII**

**[Epigraphy and Arthaśāstra]**

Time: Two Hours | Full Marks: 30

*The figures in the margin indicate full marks.*

१. सुरगिरा देवनागर्या च लिप्या त्रयः प्रश्नाः समाधेयाः। 1X3=3

(क) सिद्धल इति ग्रामः कस्य भूषणं कस्य च अलंकार आसीत्?

(ख) *स शासनं गौडनृपादवाप* – केन किं प्राप्तम्?

(ग) गोवर्धनस्य पितरौ नामत उल्लिख्येताम्।

(घ) *सिद्धान्ततन्त्रगणितार्णवपारदृश्वा* – तन्त्रशब्देनात्र का विद्या उच्यते?

(ङ) उदिताचार्येण गुर्वायतने किं प्रतिष्ठापितम्?

२. अधोलिखितेषु द्वौ प्रश्नौ समाधेयौ। 6X2=12

(क) भुवनेश्वरप्रशस्तिवर्णितं देवायतनं न भुवनेश्वरे अपि तु राढदेशे आसीत् इति अभिलेखग्रन्थसाक्ष्यम् उद्धृत्य प्रति पाद्यताम्।

(ख) लक्ष्मीं दक्षिणदोष्णि मन्त्रविभवे विश्वम्भरामण्डलं जिह्वाग्रे च सरस्वतीं रिपुतनौ नागान्तकं पत्त्रिणम्।
चक्रं पादतले निवेशितवता दिव्यं तादात्म्यं वपुर्निह्नोतुं निजचिह्नमेतदमुना नूनं विपर्यासितम्।।

– अस्य श्लोकस्य द्विविधोऽर्थः लिख्यताम्। रेखाङ्कितपदस्य ऐतिहासिकमाहात्म्यं वि चार्यताम्। (3+3)

P.T.O.

(ग) द्वितीयचन्द्रगुप्तस्य मथुरास्तम्भलेखे केषां विज्ञप्तिः क्रियते संबोधनं च? तस्मिन् अभिलेखे समुद्रगुप्त–द्वितीयचन्द्रगुप्तयोः के उपाधयः प्रयुक्ताः? तेषाम् उपाधीनां वैशिष्ट्यम् आ लोच्यताम्।

३. अधोलिखितेषु त्रयः प्रश्नाः सुरगिरा देवनागरीमाश्रित्य समाधेयाः। 1X3=3

(क) कौटिल्यमतेन त्रिवर्गमध्ये कस्य प्राधान्यं केन च हेतुना?

(ख) कीदृशो राजा चातुरन्तोऽपि सद्यो वि नश्यति??

(ग) विद्याविनयहेतुरिन्द्रियजयः केषां त्यागात् कार्यः?

(घ) व्यसनी मिथ्याचारवारितश्च कृत्यानां कयोः वर्गयोः अन्तर्भवतः?

(ङ) आचार्याः केन प्रतोदेन रहसि प्रमाद्यन्तं राजानम् अभि तुदेयुः?

४. अधोलिखितेषु द्वौ प्रश्नौ समाधेयौ। 6X2=12

(क) परविषये कृत्यपक्षीयान् कैः गूढपुरुषैः कथम् उप जापयेत्?

(ख) राजपुत्ररक्षणम् इत्यध्याये राजपुत्ररक्षण–शब्दस्य कोऽर्थः? तद्विषये कौटिल्यपूर्वाचार्याणां मतानि उप स्थाप्यन्ताम्। (1+5)

(ग) अपरुद्धवृत्तम् इति पदस्य अर्थो दीयताम्। एकचरस्य अपरुद्धस्य राजपुत्रस्य करणीयम् अधिकृत्य कौटिल्येन किमुच्यते? (1+5)